# Amba navamanimala or Arya navakam

# અમ્બા નવમણિમાલા અથવા આર્યા નવકમ્

## Document Information

Text title : ambAnavamaNimAlA athavA AryAnavakam

File name : ambAnavamaNimAlA.itx

Category : mAlAmantra, devii, pArvatI, kAlidAsa, devI, nava

Location : doc_devii

Author : attributred to Kalidas

Transliterated by : Maniam Varagoor maniamvaragoor at yahoo.com

Proofread by : corrected by Sunder Hattangadi NA, PR Ramamurthy

Latest update : June 10, 2006, September 20, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2022

*sanskritdocuments.org*

# અમ્બા નવમણિમાલા અથવા આર્યા નવકમ્

વાણીં જિતશુકવાણીમલિકુલવેણીં ભવામ્બુધિદ્રોણીમ્ ।
વીણાશુકશિશુપાણીં નતગીર્વાણીં નમામિ શર્વાણીમ્ ॥ ૧॥

કુવલયદલનીલાઙ્ગીં કુવલયરક્ષૈકદીક્ષિતાપાઙ્ગીમ્ ।
લોચનવિજિતકુરઙ્ગીં માતઙ્ગીં નૌમિ શઙ્કરાર્ધાઙ્ગીમ્ ॥ ૨॥

કમલાકમલજકાન્તાકરસારસદત્તકાન્તકરકમલામ્ ।
કરયુગલવિધૃતકમલાં વિમલાં કમલાઙ્કચૂડસકલકલામ્ ॥ ૩॥

સુન્દરહિમકરવદનાં કુન્દસુરદનાં મુકુન્દનિધિસદનામ્ ।
કરુણોજ્જીવિતમદનાં સુરકુશલાયાઽસુરેષુકૃતકદનામ્ ॥ ૪॥

અરુણાધરજિતબિમ્બાં જગદમ્બાં ગમનવિજિતકાદમ્બામ્ ।
પાલિતસુજનકદમ્બાં પૃથુલનિતમ્બાં ભજે સહેરમ્બામ્ ॥ ૫॥

શરણાગતજનભરણાં કરુણાવરુણાલયાં નવાવરણામ્ ।
મણિમયદિવ્યાભરણાં ચરણામ્ભોજાતસેવકોદ્ધરણામ્ ॥ ૬॥

તુઙ્ગસ્તનજિતકુમ્ભાં કૃતપરિરમ્ભાંશિવેન ગુહડિમ્ભામ્ ।
દારિતશુમ્ભનિશુમ્ભાં નર્તિતરમ્ભાં પુરો વિગતદમ્ભામ્ ॥ ૭॥

નતજનરક્ષાદીક્ષાં પ્રત્યક્ષદૈવતાધ્યક્ષામ્ ।
વાહીકૃતહર્યક્ષાં ક્ષપિતવિપક્ષાં સુરેષુકૃતરક્ષામ્ ॥ ૮॥

ધન્યાં સુરવરમાન્યાં હિમિગિરિકન્યાં ત્રિલોકમૂર્દ્ધન્યામ્ ।
વિહૃતસુરદ્રુમવન્યાં વેદ્મિ વિના ત્વાં ન દેવતાસ્વન્યામ્ ॥ ૯॥

એતાં નવમણિમાલાં પઠન્તિ ભક્ત્યેહ યે પરાશક્ત્યાઃ ।
તેષાં વદને સદને નૃત્યતિ વાણી રમા ચ પરમમુદા ॥ ૧૦॥

પાતય વા પાતાલે સ્થાપય વા સકલભુવનસામ્રાજ્યે ।
માતસ્તવ પદયુગલં નાહં મુઞ્ચામિ નૈવ મુઞ્ચામિ ॥ ૧૧॥

ઇતિ અમ્બા નવમણિમાલા સમાપ્તા ।
નવરત્નમાલિકા
આર્યા નવકમ્

Encoded by Maniam Varagoor
and corrected by Sunder Hattangadi, NA, PR Ramamurthy, PSA Easwaran

*Amba navamanimala or Arya navakam*
pdf was typeset on September 14, 2022

Please send corrections to *sanskrit@cheerful.com*